कृष्णाजाजी विशाला च धामार्गवफलं तथा ।
पीतं हन्ति निहन्त्याशु विद्रधीन् कोष्ठसम्भवान् ॥"
धामार्गवफलं कोषातकीफलम् ।
"श्वेतवर्षाभुवो मूलं मूलं वरुणकस्य च ।
घनेन क्वथितं पीतमन्तर्विद्रधिहृत् परम् ॥
गायत्रीत्रिफलानिम्बकटुका मधुकं समम् ।
त्रिवृत्पटोलमूलाभ्यां चत्वारोऽंशाः पृथक् पृथक् ॥
मसूरान्निस्तुषान् दद्यात् एष क्वाथो घृतान्वितः ।
विद्रधिगुल्मवीसर्पदाहमोहज्वरापहः ।
तृष्णामूर्च्छावमिहृद्रोगपित्तासृक्कुष्ठकामलाः ॥"
वाग्भटात् ।
"शिग्रुमूलं जले धौतं पिष्टं वस्त्रेण गालयेत् ।
तद्रसं मधुना पीत्वा हन्त्यन्तर्विद्रधिं नरः ॥
शोभाञ्जनकनिर्यूहो हिङ्गुसैन्धवसंयुतः ।
हन्त्यन्तर्विद्रधिं जन्तोः प्रातः प्रातर्निषेवितः ॥"
निर्यूहः क्वाथः । इति विद्रध्यधिकारः । इति भावप्रकाशः ॥

विद्रधिनाशनः, पुं, ( विद्रधिं रोगविशेषं नाशयतीति । नश+णिच्+ल्युः । ) शोभाञ्जनवृक्षः । इति त्रिकाण्डशेषः ॥

विद्रवः, पुं, ( विद्रवणमिति । वि+द्रु+"ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् । ) पलायनम् । इत्यमरः ॥ (यथा, महाभारते ।७।१०६। ३८ ।
"तैः शरैस्तव सैन्यस्य विद्रवः सुमहानभूत् ॥")
बुद्धिः । इति मेदिनी । वे, ५१ ॥ निन्दा । इति शब्दरत्नावली ॥ क्षरणम् । इति केचित् ॥ (विनाशः । यथा, बृहत्संहितायाम् । ३४ । १३ ।
"भौमे कुमारबलपति-
सैन्यानां विद्रवोऽग्निशस्त्रभयम् ॥")

विद्रावः, पुं, विद्रवः । विपूर्व्वद्रुधातोर्घञ्प्रत्ययेन निष्पन्नः ॥

विद्रावितं, त्रि, ( वि+द्रु+णिच्+क्तः । ) पलायितम् । यथा,—
"विद्राविते भूतगणे ज्वरस्तु त्रिशिराभयात् ॥"
इति श्रीभागवते वाक्ययुद्धम् ॥

विद्रुतः, त्रि, ( वि+द्रु+क्तः । ) प्राप्तद्रवीभावघृतादिः । तत्पर्य्यायः । विलीनः २ द्रुतः ३ । इत्यमरः ॥ पलायितश्च ॥ (यथा, रघुः । ११ । ४४ ।
"विद्रुतक्रतुमृगानुसारिणं
येन बाणमसृजत् वृषध्वजः ॥"
पीड़ितः । यथा, मनुः । ७ । ३ ।
"अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥")

विद्रुमः, पुं, ( विशिष्टो द्रुमः । यद्वा, विशिष्टो द्रुर्वृक्षोऽस्यास्तीति । "द्युद्रुभ्यां मः ।" ५ । २ । १०८ । इति मः । ) प्रवालः । ( यथा, ऋतुसंहारे । ६ । १७ ।
"आमूलतो विद्रुमरागताम्राः
सपल्लवं पुष्पचयं दधानाः ।
कुर्व्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥")
रत्नवृक्षः । इति मेदिनी । मे, ५३ ॥ ( यथा, रघुः । १३ । १३ ।
"तवाधरस्पर्द्धिषु विद्रुमेषु
पर्य्यस्तमेतत् सहसोर्म्मिवेगात् ।
ऊर्द्धाङ्कुरप्रोतमुखं कथञ्चित्
क्लेशादपक्रामति शङ्खयूथम् ॥")

विद्रुमलता, स्त्री, ( विद्रुम इव लता । ) नलीनामगन्धद्रव्यम् । इत्यमरः ॥

विद्रुमलतिका, स्त्री, ( विद्रुमलता । स्वार्थे कन् । टापि अत इत्वम् । ) नलिका । इति राजनिर्घण्टः ॥

विद्वत्कल्पः, त्रि, ( विद्वस्+कल्पः । ) ईषदूनो विद्वान् । इति मुग्धबोधव्याकरणम् ॥

विद्वत्तमः, त्रि, ( विद्वस्+तमः । ) अयमेषामतिशयेन विद्वान् । इति व्याकरणम् ॥

विद्वत्तरः, त्रि, ( विद्वस्+तर । ) अयमनयोरतिशयेन विद्वान् । इति व्याकरणम् ॥

विद्वद्देशीयः, त्रि, ( ईषदूनो विद्वान् । विद्वस्+देशीयर् । ) विद्वत्कल्पः । इति व्याकरणम् ॥

विद्वद्देश्यः, त्रि, ( ईषदूनो विद्वान् । विद्वस्+देश्यः । ) विद्वत्कल्पः । इति मुग्धबोधव्याकरणम् ॥

विद्वान्, [ स् ] त्रि, (वेत्तीति । विद्+शतृ । "विदेः शतुर्वसुः ।" ७ । १ । ३६ । इति शतुर्वसुरादेशः ।) आत्मवित् । प्राज्ञः । पण्डितः । इति मेदिनी ॥ ( यथा, मनुः । १ । ९७ ।
"ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः ।
कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवेदिनः ॥")

विद्विषः, पुं, ( विशेषेण द्वेष्टीति । वि+द्विष्+इगुपधेति कः । ) शत्रुः । विद्वेषके, त्रि । विपूर्व्वकद्विषधातोः कप्रत्ययेन निष्पन्नः ॥

विद्वेषः, पुं, ( वि+द्विष्+घञ् । ) शत्रुता । तत्पर्य्यायः । वैरम् २ विरोधः ३ । इत्यमरः ॥ अनुशयः ४ द्वेषः ५ समुच्छ्रयः ६ वैरत्वम् ७ । इति जटाधरः ॥ द्वेषणम् ८ । इति शब्दरत्नावली ॥ ( यथा, आर्य्यासप्तशत्याम् । ६०२ ।
"सुभग त्वभवनभित्तौ भवता संमर्द्य पीड़िता सुतनुः ।
सा पीड़यैव जीवति दधती वैलक्ष्य विद्वेषम् ॥")

विद्वेषकः, त्रि, विद्वेष्टा । द्वेषकर्त्ता । विरोधकः । वैरी । विद्वेष्टीति विपूर्व्वद्विषधातोर्णक(ण्वुल्) प्रत्ययेन निष्पन्नः ॥ ( यथा, महाभारते । १३ । ७३ । १४ ।
"न मित्रधुङ्नैकृतिकः कृतघ्नः
शठोऽनृजुर्धर्म्मविद्वेषकश्च ॥")

विद्वेषणं, स्त्री, विद्वेषः । विपूर्व्वद्विषधातोरनट् (ल्युट्)प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । ३ । १६५ । ३ ।
"विद्वेषणं परमं जीवलोके
कुर्य्यान्नः पार्थिव याच्यमानः ।
तत्त्वां पृच्छामि कथयस्व राजन्
दद्याद्भवान् दयितञ्च मेऽद्य ॥")
अभिचारकर्म्मविशेषः । तस्य विहितदिनादि यथा,—
"सूर्य्योदयं समारभ्य घटिकादशकं क्रमात् ।
ऋतवः स्युर्व्वसन्ताद्या अहोरात्रं दिने दिने ॥
वसन्तग्रीष्मवर्षाश्च शरद्धेमन्तशैशिराः ।
हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्म्मणि ॥
शिशिरः स्तम्भने ज्ञेयो विद्वेषे ग्रीष्म ईरितः ।
प्रावृषुच्चाटने ज्ञेया शरन्मारणकर्म्मणि ॥"
पौर्णमासी मन्दभानुयुक्ता विद्वेषकर्म्मणि ॥
वश्यं पूर्व्वेऽह्नि मध्याह्ने विद्वेषोच्चाटनं तथा ।
शान्तिपुष्टी दिनस्यान्ते सन्ध्याकाले च मारणम् ॥
कुर्य्याच्च स्तम्भनं कार्य्यं पूर्व्वपट्टिकोदये ।
द्वेषोच्चाटादिकं कर्म्म कुलीरे वा तुलोदये ॥"
भूतोदयनियममाह ।
"जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितः ।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम् ॥"
दिङ्नियममाह ।
"याम्ये रक्षसि विद्वेषं शान्तिं वारुणवायवे ॥"
नक्षत्रनियममाह ।
"विद्वेषोच्चाटनं वह्निवायुयोगे च कारयेत् ॥"
अथ विद्वेषणं वक्ष्ये मिथो विद्वेषणं रिपोः ।
करणीयं महेशानि ! यदुक्तं मालिनीमते ॥
अन्योन्ययुद्धसंरम्भरुषितौ समरे शुनौ ।
तदीयनखरोद्धीनधूलिमादाय साधकः ॥
धूलिना तेन विद्वेषस्ताड़नादभिजायते ॥ ॥
परस्परं रिपोर्व्वैरं मित्रेण सह निश्चितम् ।
महिषाश्वपुरीषाभ्यां गोमूत्रेण समालिखेत् ॥
यस्य नाम तयोः शीघ्रं विद्वेषः परस्परम् ।
रक्तेन महिषाश्वेन श्मशानवस्त्रके लिखेत् ॥
यस्य नाम भवेत्तस्य काकपक्षेण लेखितम् ।
वेष्टयेत् द्विजचाण्डालकेशैरेकतरैस्ततः ॥
गर्त्ते आमशरावन्तु पिधायाननमध्यतः ।
षट्कोणचक्रमध्ये तु रिपोर्नामसमन्वितम् ॥
मन्त्रराजं प्रवक्ष्यामि महाभैरवसंज्ञकम् ।
ॐ नमो महाभैरवाय रुद्ररूपाय श्मशानवासिने अमुकामुकयोर्व्विद्वेषं कुरु कुरु सुरु सुरु हुँ हुँ फट् ।
एतन्मन्त्रं लिखित्वा च विद्वेषो जायते ध्रुवम् ॥"
इति षट्कर्म्मदीपिका ॥
( विशेषेण द्वेष्टीति । वि+द्विष+ल्युः । विद्वेषके, त्रि । यथा, हरिवंशे । २८ । ३० ।
"नास्ति-वादार्थशास्त्रं हि धर्म्मविद्वेषणं परम् ॥"
तथा च महाभारते । १३ । १२६ । २ ।
"ब्राह्मणानां परीवादो मम विद्वेषणं महत् ।
ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः ॥")

विद्वेष(षि)णी, स्त्री, स्त्रीविशेषः । यथा,—
"विद्वेषणी तु या कन्या भ्रुकुटीकुटिलानना ।
तस्या द्वौ तनयावास्तामयकारप्रकाशकौ ॥"
इति मार्कण्डेयपुराणे दुःसहवंशोत्पत्तिः ॥

विद्वेषी, [ न् ] त्रि, (विशेषेण द्वेष्टीति । वि+द्विष्+णिनिः ।) यद्वा, विद्वेषशब्दादस्त्यर्थे इन्प्रत्ययेन निष्पन्नः । विद्वेषविशिष्टः । वैरी । (यथा,